
* Organised One Day National Seminar on "Human Rights in Sanskrit Literature - Role of Youth in Managing with them on 10th December, 2018. Dr.R.Chandrasekhar, N.S.S. Programme Officer, Unit-II was the Seminar Co-ordinator. The Inaugural Session commenced at 9.00 a.m. with invocation by Dr.Niranjan Mishra followed bthe lighting of Lamp by the delegates. Dr.Kalyan Shastri, Programme Officer, Unit-III welcomed the gathering. Sri Madabhusi Dorai Raj, Senior Advocate, Tirupati was the Chief Guest and addressed the studence about the importance of Human Rights elaborately. Prof.V.Muralidhara Sharma, Honb'e Vice-Chancellor, President of the Inaugural Session quoted several examples from the ancient Sanskrit Scriptures about the Human Rights and Role of Youth. Hon'ble Vice-Chancellor Felicitated the Chief Guest. Prof. Satyanarayana Acharya concluded with Vote of Thanks. In this Seminar 10 technical Sessions were conducted with a break of 45 minuters for lunch. 72 participants from Karnataka, Kerala, Odisha, Telengana and Andhra Pradesh presented excellent papers. Participants from



near by institutions like Sri Venkateswar University, S.P.Oriental College etc. took part in the Seminar. The ***Valedictory Session*** commenced at 5.00 p.m. with Vedic Prayer by Mr.Sanjay Rath, NSS Volunteer. Dr.D.Jyothi, Programme Officer, NSS Unit - IV welcomed the delegates and the gathering. Dr. R.Chandrasekhar, Seminar Co-oridnator gave a brief report of the Seminar, Sri K.Ajay Kumar, Leading Advocate was the Chief Guest. He expressed his happiness in conducting Seminar on Human Rights to the Yougth which is the need of the hour. Prof.G.S.R.Krishnamurthy, Registrar, R.S.Vidyapeetha presided the session. Participants from other states expressed that they were very much benefitted.

# राष्ट्रियमानवाधिकारदिवसे चर्चासत्रम्




विगते दिसम्बरमासस्य दशमदिनाङ्के (10.12.2018) विद्यापीठस्य राष्ट्रियसेवायोजनापक्षतः "संस्कृतसाहित्ये मानवाधिकारः, तत्सम्परिपोषणे यूनां भूमिका" (Human Rights in Sanskrit Literature - the role of youth in managing with them) इति विषयमधिकृत्य एक-दिवसात्मकं चर्चासत्रमेकं समायोज्यत । कार्यक्रमेऽस्मिन् न्यायतन्त्रस्य (Judiciary) वरिष्ठाधिवक्तारः (Senior Advocate) **माडाभूसि डोराइ राजवर्याः** मुख्यातिथिपदं व्यभूषयन् । सन्दर्भेऽस्मिन् ते अवोचन् यत् — "मानवाधिकारः केनापि संविधानेन न प्रणीतः, एषः आप्राचीनकालात् निर्धारितोऽस्ति। ग्रीक्सभ्यतायाः समयादेव अस्य प्रचलनमासीत् । कोऽपि अस्य विकर्षणं साधयितुं न शक्नोति । संयुक्तराष्ट्रसङ्घेन (UNO) 1945 ख्रीष्टाब्दे प्रणीतधारायाणः 1.3 परोच्छेदे मानवाधिकारस्य, शान्तेः, गौरवस्य च विषये यथेष्टं विवरणं प्रदत्तमस्ति । तत्रापि विश्वभ्रातृत्वम्, राष्ट्रियतायाः अधिकारः इत्यादिविषये चर्चा कृता वर्तते । संस्कृतशास्त्रेष्वपि मानवा-धिकारस्य बहुधा विचारविमर्शः प्राप्यते ।" इति । विद्यापीठस्य मान्याः कुलपतयः सत्रेऽस्मिन् आध्यक्ष्यं निरवहन् । अधिकार-कर्तव्ययोर्मध्ये कश्चन सम्परायः दृश्यते इति अध्यक्षाणामाशय आसीत् । तैरुक्तम् — "Before asking for protection of rights, and individual should remember that he/she has certain responsibilities." शिक्षानुष्ठानेषु गुरुशिष्ययोः कर्तव्याकर्तव्यविषये बोधयन्तः मान्याः कुलपतयः मनुस्मृति-भगवद्गीता-उपनिषदामुदाहरणानि प्रास्तुवन् ।



सम्पूर्णस्य कार्यक्रमस्य संयोजकाः राष्ट्रियसेवायोजनायाः प्रकल्पाधिकारिणः **डॉ.आर्.चन्द्रशेखरमहोदयाः**, **डा.ओ.जि. कल्याणशास्त्रिवर्याश्च** आसन् । अवसरेऽस्मिन् राष्ट्रियसेवा-योजनायाः संयोजकाः आचार्यसत्यनारायणाचार्यमहोदयाः, कुलसचिवाः आचार्य जि.एस्.आर्.कृष्णमूर्त्तिवर्याः, अन्ये केरल-कर्णाटकादिप्रान्तेभ्यः समागताः विद्वांसः उपस्थिता आसन् ।